# Shri Pratyangira SarvarthasAdhaka Kavacham

# શ્રી પ્રત્યઙ્ગિરા સર્વાર્થસાધકકવચમ્

## Document Information

Text title : pratyangirAkavacham

File name : pratyangirAkavacham.itx

Category : devii, kavacha, otherforms, devI

Location : doc_devii

Transliterated by : Krishna Vallapareddy krishna321 at hotmail.com

Proofread by : Krishna Vallapareddy, PSA Easwaran

Description/comments : rudrayAmala tantre panchANgakhaNDe

Latest update : March 30, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Shri Pratyangira SarvarthasAdhaka Kavacham

# શ્રી પ્રત્યઙ્ગિરા સર્વાર્થસાધકકવચમ્

દેવ્યુવાચ ।
ભગવન્ સર્વધર્મજ્ઞ સર્વશાસ્ત્રાર્થપારગ ।
દેવ્યાઃ પ્રત્યઙ્ગિરાયાશ્ચ કવચં યત્પ્રકાશિતમ્ ॥ ૧॥

સર્વાર્થસાધનં નામ કથયસ્વ મયિ પ્રભો ।
ભૈરવ ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ કવચં પરમાદ્ભુતમ્ ॥ ૨॥

સર્વાર્થસાધનં નામ ત્રૈલોક્યે ચાઽતિદુર્લભમ્ ।
સર્વસિદ્ધિમયં દેવિ સર્વૈશ્વર્યપ્રદાયકમ્ ॥ ૩॥

પઠનાચ્છ્રવણાન્મર્ત્યસ્ત્રૈલોક્યૈશ્વર્યભાગ્ભવેત્ ।
સર્વાર્થસાધકસ્યાઽસ્ય કવચસ્ય ઋષિઃ શિવઃ ॥ ૪॥

છન્દો વિરાટ્ પરાશક્તિર્જગદ્ધાત્રી ચ દેવતા ।
ધર્માઽર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૫॥

વિનિયોગઃ-
ૐ શ્રીસર્વાર્થસાધકકવચસ્ય શિવ ઋષિઃ ।
વિરાટ્ છન્દઃ । શ્રીમત્પ્રત્યઙ્ગિરા દેવતા । ઐં બીજમ્ । હ્રીં શક્તિઃ ।
શ્રીં કીલકં શ્રીસદાશિવદેવતા પ્રીત્યર્થે પાઠે વિનિયોગઃ ॥

ૐ પ્રણવં મે શિરઃ પાતુ વાગ્ભવં ચ લલાટકમ્ ।
હ્રીં પાતુ દક્ષનેત્રં મે લક્ષ્મીર્વામ સુરેશ્વરી ॥ ૧॥

પ્રત્યઙ્ગિરા દક્ષકર્ણં વામે કામેશ્વરી તથા ।
લક્ષ્મીઃ પ્રાણં સદા પાતુ વદનં પાતુ કેશવઃ ॥ ૨॥

ગૌરી તુ રસનાં પાતુ કણ્ઠં પાતુ મહેશ્વરઃ ।
સ્કન્ધદેશં રતિઃ પાતુ ભુજૌ તુ મકરધ્વજઃ ॥ ૩॥

શઙ્ખનિધિઃ કરૌ પાતુ વક્ષઃ પદ્મનિધિસ્તથા ।
બ્રાહ્મી મધ્યં સદા પાતુ નાભિં પાતુ મહેશ્વરી ॥ ૪॥

કૌમારી પૃષ્ઠદેશં તુ ગુહ્યં રક્ષતુ વૈષ્ણવી ।
વારાહી ચ કટિમ્પાતુ ચૈન્દ્રી પાતુ પદદ્વયમ્ ॥ ૫॥

ભાર્યાં રક્ષતુ ચામુણ્ડા લક્ષ્મી રક્ષતુ પુત્રકાન્ ।
ઇન્દ્રઃ પૂર્વે સદા પાતુ આગ્નેય્યાં અગ્નિદેવતા ॥ ૬॥

યામ્યે યમઃ સદા પાતુ નૈરૃત્યાં નિરૃતિસ્તથા ।
પશ્ચિમે વરુણઃ પાતુ વાયવ્યાં વાયુદેવતા ॥ ૭॥

સૌમ્યાં સોમઃ સદા પાતુ ચૈશાન્યામીશ્વરો વિભુઃ ।
ઊર્ધ્વં પ્રજાપતિઃ પાતુ હ્યધશ્ચાઽનન્તદેવતા ॥ ૮॥

રાજદ્વારે શ્મશાને તુ અરણ્યે પ્રાન્તરે તથા ।
જલે સ્થલે ચાઽન્તરિક્ષે શત્રૂણાં નિગ્રહે તથા ॥ ૯॥

એતાભિઃ સહિતા દેવી ચતુર્બીજા મહેશ્વરી ।
પ્રત્યઙ્ગિરા મહાશક્તિઃ સર્વત્ર માં સદાઽવતુ ॥ ૧૦॥

ફલશ્રુતિઃ ।
ઇતિ તે કથિતં દેવિ સારાત્સારં પરાત્પરમ્ ।
સર્વાર્થસાધનં નામ કવચં પરમાદ્ભુતમ્ ॥ ૧॥

અસ્યાઽપિ પઠનાત્સદ્યઃ કુબેરોઽપિ ધનેશ્વરઃ ।
ઇન્દ્રાદ્યાઃ સકલા દેવાઃ ધારણાત્પઠનાદ્યતઃ ॥ ૨॥

સર્વસિદ્ધીશ્વરો સન્તઃ સર્વૈશ્વર્યમવાપ્નુયુઃ ।
પ્રીતિમન્યેઽન્યતઃ કૃત્વા કમલા નિશ્ચલા ગૃહે ॥ ૩॥

વાણી ચ નિવસેદ્વક્ત્રે સત્યં સત્યં ન સંશયઃ ।
યો ધારયતિ પુણ્યાત્મા સર્વાર્થસાધનાભિધમ્ ॥ ૪॥

કવચં પરમં પુણ્યં સોઽપિ પુણ્યવતાં વરઃ ।
સર્વૈશ્વર્યયુતો ભૂત્વા ત્રૈલોક્યવિજયી ભવેત્ ॥ ૫॥

પુરુષો દક્ષિણે બાહૌ નારી વામભુજે તથા ।
બહુપુત્રવતી ભૂયાદ્વન્ધ્યાઽપિ લભતે સુતમ્ ॥ ૬॥

બ્રહ્માસ્ત્રાદીનિ શસ્ત્રાણિ નૈવ કૃન્તન્તિ તત્તનુમ્ ।

એતત્કવચમજ્ઞાત્વા યો જપેત્પરમેશ્વરીમ્ ॥ ૭॥

દારિદ્ર્યં પરમં પ્રાપ્ય સોઽચિરાન્મૃત્યુમાપ્નુયાત્ ॥

શ્રી રુદ્રયામલ તન્ત્રે પઞ્ચાઙ્ગખણ્ડે પ્રત્યઙ્ગિરાયાઃ
સર્વાર્થસાધનં નામકં કવચં પરિપૂર્ણમ્ ॥

Encoded by krishna vallapareddy krishna321 at hotmail.com
Proofread by krishna vallapareddy, PSA Easwaran

---

*Shri Pratyangira SarvarthasAdhaka Kavacham*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*